नारी पुष्यदिने पीत्वा गोक्षीरेणोपवासतः ॥
श्वेतार्कस्य तु वै मूलं तस्यास्तद्गुल्मशूलनुत् ॥
श्वेतार्कमूलं विधिना गृहीतं पूर्व्वसंस्थितम् ।
कृतमुद्रा च ललना कटौ बद्ध्वा नरोऽथ वा ।
नारी पुत्रं हि लभते सुरते वृषभध्वज ! ।
हस्तबद्धं पलाशस्य अपामार्गस्य वा हर ! ।
मूलं सर्व्वज्वरहरं भूतप्रेतादिनुद्भवेत् ॥
पीतं वृश्चिकमूलन्तु पर्य्युषितजलेन वै ।
सार्द्धं विनाशयेद्दाहज्वरञ्च परमेश्वर ! ।
शिखायाञ्चैव तद्बद्धं भवेदेकाहिकादिनुत् ॥
एतत् सकाञ्जिकं पीतं रक्तकुष्ठज्वरादिनुत् ।
वास्योदकेन पीतं तद्धृद्विषहरं भवेत् ॥
यस्य लज्जालुकामूलं दीयते बद्धवेतसा ।
सार्द्धं स वै वशं याति पुमान् स्त्री वा न संशयः ॥
पिष्ट्वा गव्यघृतेनैव पाठामूलं पिबेत्तु यः ।
गरं विषं तस्य नश्येन्नात्र कार्य्या विचारणा ॥
वास्योदकयुतं मूलं शिरीषस्य यथा तथा ।
रक्तचित्रकमूलस्य शमनं भरणाद्धर ! ॥
कर्णयोः कामलाव्याधिविनाशः स्यान्न संशयः ॥
श्वेतकोकिलाक्षमूलं छागीक्षीरेण संयुतम् ।
त्रिसप्ताहेन वै पीतं क्षयरोगं क्षयं नयेत् ।
नारिकेलस्य वै पुष्पं छागीक्षीरेण संयुतम् ।
पिबेच्च त्रिविधस्तस्य रक्तवातो विनश्यति ॥
कुर्य्यात् सुदर्शनामूलं आदित्ये तु समाहृतम् ।
कण्ठबद्धं ह्याहिकादिग्रहभूतविनाशनम् ॥
पुष्ये धवलगुञ्जाया गृहीतं मूलमुत्तमम् ।
मुखे तु निहितं रुद्र ! हरेत् गरविषं बहु ॥
हस्ते बद्धं कारुनुत्र कण्ठबद्धं ग्रहादिनुत्" ॥
इति गारुड़े १९३ अध्यायः ॥ * ॥

हरिरुवाच ।

"अपराजिताया मूलञ्च गोमूत्रेण समन्वितम् ।
पीतञ्चापि हरत्येव गण्डमालां न संशयः ॥
तथेन्द्रवारुणीमूलं विधिना पीतमीश्वर ! ।
निर्गुण्डीरण्डकं रुद्र ! शूकशिम्बीसमन्वितम् ॥
शीतोदकञ्च तन्नस्यो बाहुग्रीवाव्यथां हरेत् ॥
माहिषं नवनीतञ्च अश्वगन्धा च पिप्पली ।
वचा कुष्ठं त्वयं लेपो लिङ्गश्रोत्रस्तनर्द्धिकृत् ॥
कुष्ठनागबलाचूर्णं नवनीतसमन्वितम् ।
तल्लेपो युवतीनाञ्च कुर्य्यान्मनोहरं स्तनम् ॥
विटपेन्द्रवारुणीमूलं यस्य नाम्ना समुद्धृतः ।
निक्षिप्यते समुत्पाट्य तस्य प्लीहा विनश्यति ॥
पुनर्णवायाः शुक्लाया मूलं तण्डुलवारिणा ।
पीतं विद्रधि नश्येच्च नात्र कार्य्या विचारणा ॥
कदली यवक्षारन्तु पानीयेन प्रसाधितम् ।
तदास्वादनान्नश्यन्ति उदरस्थाधयोऽखिलाः ॥
वदरीकारवीमूलं गुड़ाढ्येन समन्वितम् ।
अग्निना साधितं जग्ध्वा कृमीन् सर्व्वान् हरेत् शिव ! ॥
नित्यं निम्बदलानाञ्च चूर्णमामलकस्य च ।
प्रत्यूषे भक्षयेच्चैव तस्य कुष्ठं विनश्यति ॥
हरीतकी विड़ङ्गञ्च हरिद्रा सितसर्षपाः ।
सोमराजस्य वीजानि करञ्जस्य च सैन्धवम् ।
गोमूत्रपिष्टान्येतानि कुष्ठरोगहराणि च ॥
एकञ्च त्रिफलाभागस्तथा भागद्वयं शिव ! ।
सोमराजस्य वीजानां जग्धं पथ्या च दद्रुनुत् ॥
अम्लतक्रं सगोमूत्रं क्वथितं लवणान्वितम् ।
कांस्यघृष्टं खरं लेपात् कुष्ठदद्रुविनाशनम् ॥
हरिद्रा हरितालञ्च दूर्व्वागोमूत्रसैन्धवम् ।
अयं लेपो हन्ति दद्रु पामानं वै गरं तथा ॥
सोमराजस्य वीजानि नवनीतयुतानि च ।
मधुनास्वादितानि स्युः शुक्लकुष्ठहराणि वै ।
तक्रानुपानतो रुद्र ! नात्र कार्य्या विचारणा ॥
सितापराजितामूलं वर्त्तितं वास्यवारिणा ।
तल्लेपो रुद्र ! मासेन शुक्लकुष्ठविनाशनः ॥
माहिषं नवनीतञ्च सिन्दूरञ्च मरीचकम् ।
पामा विलेपिता नश्येद्बहुलापि वृषध्वज ! ॥
विशुष्कगम्भारिमूलं पक्वक्षीरेण संयुतम् ।
भक्षितं शुक्रपित्तस्य विनाशकरमीश्वर ! ॥
मूलकस्य च वीजानि अपमार्गरसेन वै ।
पिष्टानि तेन लेपेन सिक्किका रुद्र ! नश्यति ॥
कदलीक्षारसंयुक्ता हरिद्रा सिक्किकापहा ।
रम्भापामार्गयोः क्षार एकत्तैलविमिश्रितः ॥
तदभ्यङ्गान्महादेव ! सद्यः सिध्म विनश्यति ।
कुष्माण्डनालक्षारस्तु सगोमूत्रस्त्र तत्त्वचः ॥
जलपिष्टा हरिद्रा च सिद्धा मन्दानलेन हि ।
माहिषेण पुरीषेण वेष्टिता वृषभध्वज ! ॥
अस्या उद्वर्त्तनं कुर्य्यादङ्गगौरत्वमीश्वर ! ।
तिलसर्षपसंयुक्तं हरिद्राद्वयकुष्ठकम् ॥
तेनोद्वर्त्तितदेहः स्यादुज्ज्वलः सुरभिः पुमान् ।
मनोहरश्चानुदिनं दूर्व्वाया काकजङ्घया ॥
अर्ज्जुनस्य तु पुष्पाणि जम्बुपत्रयुतानि च ।
सलोध्राणि च तल्लेपो देहदुर्गन्धतां हरेत् ॥
मन्दोष्णोऽशिरं वै चूर्णन्तु कनकस्य च ।
तेनोद्वर्त्तितदेहस्य हरेद्ग्रीष्मप्रसारिकाम् ॥
लगदोषश्चैव देवेन्द्र ! घर्म्मदोषश्च नश्यति ।
काकजङ्घोद्वर्त्तनञ्च अङ्गरागकरं भवेत् ॥
यष्टीमधु शर्करा च वासकस्य रसो मधु ।
एतत् पीतं रक्तपित्तकामलापाण्डुरोगनुत् ॥
रक्तपित्तं हरेत् पीतो वासकस्य रसो मधु ।
स्वापकाले तोयपानात् पीनसं प्रहितं हरेत् ॥
विभीतकस्य वै चूर्णं पिप्पलीसैन्धवस्य च ।
पीतं सकाञ्जिकं हन्ति स्वरभेदं महेश्वर ! ॥
चूर्णमामलकस्यैव पीतं शूलहरं परम् ॥
मनःशिला बलामूलं काकपर्णञ्च गुग्गुलुम् ।
जातीपत्रं कोलिपत्रं तथा चैव मनःशिला ।
एभिश्चैव कृता वर्त्तिर्वदरामौ महेश्वर ! ॥
धूमपानं कासहरं नात्र कार्य्या विचारणा ॥
त्रिफलापिप्पलीचूर्णं भक्षितं मधुना युतम् ॥
भोजनादौ हि समधु पिपासां त्वरितं हरेत् ।
विल्वमूलञ्च समधु गुड़ूचीक्वथितं जलम् ॥
पीतं हरेच्च त्रिविधं छर्द्दिं वै नात्र संशयः ।
पीता दूर्व्वा छर्द्दिनुत् स्यात् पिष्टा तण्डुलवारिणा" ॥
इति गारुड़े १९४ अध्यायः ॥ * ॥

हरिरुवाच ।

"पुनर्णवाया मूलञ्च श्वेतं पुष्ये समाहृतम् ।
वारिपीतं तस्य पार्श्वे भवनेषु न पन्नगाः ॥
ताद्धं मूर्त्तिं वह्नेद्यो वै भल्लूकदन्तनिर्म्मिताम् ।
स पन्नगैर्न दश्येत यावज्जीवं वृषध्वज ! ॥
पिबेद्गण्डमूलं यः पुष्यर्क्षे रुद्र ! वारिणा ।
तस्मिन्नपास्तदशना नागाः स्युर्नात्र संशयः ॥
पुष्ये लज्जालुकामूले हस्तबद्धे तु पन्नगान् ।
गृह्णीयात्क्षेपतो वापि नात्र कार्य्या विचारणा ॥
पुष्ये श्वेतार्कमूलञ्च पीतं शीतेन वारिणा ।
नश्येत दन्तकविषं करवीरादिजं विषम् ॥
महाकालस्य वै मूलं पिष्टं तत् काञ्जिकेन वै ।
वोड्रमण्डलिकानाञ्च तल्लेपो हरते विषम् ॥
तण्डुलीयकमूलञ्च पिष्टं तण्डुलवारिणा ।
घृतेन सह पीतन्तु हरेत् सर्पविषाणि च ॥
नीली लज्जालुकामूलं पिष्टं तण्डुलवारिणा ।
पीत्वा दद्रुष्टकविषं नश्येदेकेन चोभयोः ॥
कुष्माण्डकफलरसः सगुड़ः सहशर्करः ।
पीतः सदुग्धो मोहन्तु तद्दष्टस्य विषस्य वै ॥
तथा काद्रवभूतस्य मोहस्य हर एव च ।
यष्टीमधुसमायुक्ता पीता च सितशर्करा ॥
सदुग्धा च त्रिरात्रेण मूषाविषहरा भवेत् ॥
चुम्बुकत्रयपानाच्च वारिणः शीतलस्य वै ।
ताम्बूलजग्धरोमाञ्च मुखलाला विनश्यति ॥
घृतं सशर्करं पीत्वा मद्यपानमदो न वै ।
कृष्णाङ्कोठस्य मूलेन पीतमत्क्वथितं जलम् ।
ततो नश्येद्दारुविषं त्रिरात्रेण महेश्वर ! ॥
उष्णं गव्यघृतं पीतं सैन्धवेन समन्वितम् ।
नाशयेत्तन्महादेव ! वेदनां वृश्चिकोद्भवाम् ॥
कुसुम्भं कुङ्कुमञ्चैव हरितालं मनःशिला ।
करञ्जमिश्रितञ्चैव अर्ककीटञ्च शाल्मली ॥
विषं नृणां विनश्येत एतेषां भक्षणाच्छिव ! ।
दीपतैलप्रदानाच्च दंशे वृश्चिकजे शिव ! ॥
खर्ज्जुरकविषं नश्येत्तदा वै नात्र संशयः ।
दंशस्थानं वृश्चिकस्य रुद्र ! गुग्गुलुधूपितम् ॥
विषं नश्येत्ततो रुद्र ! नात्र कार्य्या विचारणा ॥
अङ्कोठपत्रधूपेन नश्येन्मूषिकजं विषम् ॥
नागेश्वरमरीचानि शुण्ठी तगरपादिका ।
नश्येन्मधुमक्षिकाया एतेषां लेपतो विषम् ॥
शतपुष्पा सैन्धवञ्च साज्यं वा तेन लेपतः ।
शिरीषस्य च वीजं वै सितक्षीरेण घर्षितम् ॥
तल्लेपेन महादेव ! नश्येदुन्दुरुजं विषम् ॥
ज्वलिताग्निना विसेकी तथा दर्द्दुरजं विषम ॥
धुस्तूरकरसोन्मिश्रं क्षीराज्यगुड़पानतः ।
शुनां विषं विनश्येत शशाङ्ककृतशेखर ! ॥
वटनिम्बशमीनाञ्च वल्कलैः क्वथितं जलम् ।
तत्सेकान्नखदन्तानां नश्येद विषवेदनाम् ॥
देवदारु हरिद्रा च गैरिकस्य च लेपनात् ।
नागेश्वरं हरिद्रे द्वे मञ्जिष्ठा देवदारुकम् ।
एभिर्लेपाद्विनश्येत लूताविषमुमापते" ! ॥
इति गारुड़े १९५ अध्यायः ॥ * ॥

हरिरुवाच ।

"एकं पुनर्णवामूलं अपामार्गस्य वा शिव ! ।
सरसं योनिविक्षिप्तं वराङ्गस्य व्यथां हरेत् ॥